चापं पाशाङ्कुशसरसिजान्यङ्कुशं पुष्पबाणान्
संबिभ्राणां करसरसिजैः रत्नमौलिं त्रिनेत्राम् ।
हेमाभाभां कुचभरनतां रत्नमञ्जीरकाञ्ची-
ग्रैवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्याम् ॥
चामरादर्शताम्बूलकरण्डकसमुद्गकान् ।
वहन्तीभिः कुचार्त्ताभिर्दूतीभिः परिवारिताम् ॥
करुणामृतवर्षिण्या पश्यन्तीं साधकं दृशा ॥"
इति तन्त्रसारः ॥

त्रिपुटी, [न्] पुं, (त्रिपुट इव आकारोऽस्य-स्येति । त्रिपुट+इनिः ।) एरण्डवृक्षः । इति शब्दमाला ॥

त्रिपुटी, स्त्री, (त्रीणि पुटानि यस्याः । गौरादित्वात् ङीष् ।) त्रिवृता । इत्यमरटीकायां भरतः ॥ (त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समाहारः । "द्विगोः ।" इति ङीप् । ज्ञातृज्ञानज्ञेयरूपपुटत्रयम् । यथा, पञ्चदश्याम् । ११ । १४ ।
"भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात् ।
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो ॥")

त्रिपुटीफलः, पुं, (त्रिपुटी पुटत्रयं फले यस्य ।) एरण्डः । इति हारावली । १०८ ॥

त्रिपुण्ड्रं, क्ली, (त्रयाणां पुण्ड्राणां इक्षुवदाकाराणां समाहारः ।) भस्मादिकृतकपालस्थ-तिर्य्यग्रेखात्रयम् । यथा,—
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम् ॥"
इति तिथ्यादितत्त्वम् ॥
ब्रह्माण्डपुराणे ।
"ऊर्द्धपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया ॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्त्रियश्च त्रिपुण्ड्रकम् ।
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः ॥"
इत्याह्निकाचारतत्त्वम् ॥
"शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक्त्रिपुण्ड्रकम् ।
विष्णागमे दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत् ॥"
इति नागोजीभट्टधृतसूतसंहिता ॥
(यथा, शब्दचिन्तामणिधृतदेवीभागवतम् ।
"येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम् ।
श्मशानसदृशं तत् स्यान्न प्रेक्ष्यं पुण्यकृज्जनैः ॥"
"त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते ।
धारयन्ति च ये भक्त्या धारयन्ति तमेव ते ॥
तिर्य्यग्रेखा प्रदृश्यन्ते ललाटे सर्व्वदेहिनाम् ।
तथापि मानवा मूर्खा न कुर्व्वन्ति त्रिपुण्ड्रकम् ॥")

त्रिपुण्ड्रकं, क्ली, (त्रिपुण्ड्रमेव । स्वार्थे कः ।) त्रिपुण्ड्रम् । यथा,—
"वक्त्रा ललाटमाणिक्यो भस्मरेखात्रिपुण्ड्रकम् ॥"
इति हारावली । ६२ ॥

त्रिपुरं, क्ली, (त्रयाणां पुराणां समाहारः । तद्धितार्थेति समासः । पात्रादित्वात् स्त्रीत्वाभावः ।) मयदानवनिर्म्मितं पुरत्रयम् । (यथा, महाभारते । ३ । ४१ । ३८ ।
"महात्मना शङ्करेण त्रिपुरं निहतं यदा ।
तदेतदस्त्रं निर्म्मुक्तं येन दग्धा महासुराः ॥")
पुरा असुरा देवैर्निर्जिताः सन्तो मायिनां परमाचार्य्यं मयं शरणमाययुः । स गमनागमने स्वेच्छया दुर्व्वितर्क्यपरिच्छदा हैमी रौप्यायसीति तिस्रः पुरो निर्म्माय तेभ्यो ददौ ते असुरास्ताभिः पुरीभिरलक्षिताः पूर्व्ववैरमनुस्मरन्तः सेश्वरान् त्रीन् लोकान् नाशयाञ्चक्रुस्ततः सेश्वरा लोका हरं उपासाञ्चक्रिरे । हरो मा भैष्टेति सुरानुकार्य्ये धनुषि शरं सन्धाय पुरेषु असृजत् । तैः शरैः स्पृष्टाः पुरौकसोऽसुरा अगवः सन्तो निपेतुः । महायोगी मयस्तानसुरानानीय त्रिपुरस्थितसिद्धामृतरसकूपेऽक्षिपत् तेऽसुरास्तद्रसं स्पृष्ट्वा दृढ़शरीराः सन्त उत्तस्थुस्तदा विष्णुर्गौर्ब्रह्मा च वत्सो भूत्वा त्रिपुरं प्रविश्य रसकूपामृतं पपौ असुरा विष्णुमायया मोहिताः सन्तो न न्यषेधन् तदा विष्णुः स्वाभिः शक्तिभिः शम्भोर्युद्धोपकरणं रथसारथिधनुर्व्वाणादिकं व्यधात् । ततः शम्भुः सन्नद्धो रथमास्थाय शरन्धनुषि सन्धाय मध्याह्नकाले त्रिपुरं ददाह । इति श्रीभागवतम् ॥ (त्रीणि पुराणि यस्येति विग्रहे त्रिपुरासुरे, पुं । यथा, महाभारते । ७ । २०० । ७६ ।
"आरुह्य स रथं दिव्यं सर्व्वदेवमयं शिवः ।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः ॥")

त्रिपुरदहनः, पुं, (त्रिपुरं दहतीति । दह+ल्युः ।) शिवः । इति हारावली । ८ ॥

त्रिपुरभैरवी, स्त्री, (त्रिपुरा धर्म्मार्थकामानां दात्री । सा चासौ भैरवी चेति ।) देवीविशेषः । तन्मन्त्रादि यथा,—
"वैष्णवी मन्त्रसुखेषु त्रिपुरायास्ततः शृणु ।
तस्यास्तु सर्व्वमन्त्राणि त्रयोदशयुतानि वै ॥
विंशतिस्तु सहस्राणि तत्राद्यं वाग्भवं स्मृतम् ।
द्वितीयं कामराजाख्यं मोहनञ्च तृतीयकम् ॥
आम्रेडितं वाग्भवन्तु चतुर्थं परिकीर्त्तितम् ।
नेत्रवीजं द्वितीयन्तु द्विरुक्तं वाग्भवं तथा ॥
आद्यं तत् पञ्चमं प्रोक्तं चतुर्भिरपि चाक्षरैः ।
नेत्रवीजं द्वितीयन्तु प्रथमं परिकीर्त्तितम् ॥
द्वितीयं कामराजन्तु तृतीयं वाग्भवं तथा ।
एभिस्त्रिभिश्च यन्मन्त्रं तत् षष्ठं परिकीर्त्तितम् ॥
नेत्रवीजद्वितीयेन वाग्भवान्तेन सप्तमम् ।
तदेव वाग्भवाद्यन्तु अष्टमं परिकीर्त्तितम् ॥
वाग्भवं कामराजञ्चेत्येताभ्यां नवमं स्मृतम् ।
कामराजं तथैवाद्यं द्वितीयञ्चैव मोहनम् ॥
एकादशमिदं प्रोक्तं तदेवाद्यन्तु वाग्भवम् ।
द्वादशं कीर्त्तितं मन्त्रं शेषतस्त्रैपुरं महत् ॥
तन्महत् त्रैपुरं मन्त्रं श्रृणुष्वैकमनाश्चिरम् ।
प्रान्तादिस्तस्य चाद्यादिर्वह्निर्वाग्भवसंश्रितः ॥
आद्यं त्रिपुरभैरव्या वीजमाद्यं प्रकीर्त्तितम् ।
उपान्त्यश्च तदादिश्च प्रजनाद्यं दृषाद्यकः ॥
चतुर्थस्वरविन्दिन्दुयुक्तञ्चैतत् द्वितीयकम् ।
उपान्त्यश्च तदादिश्च वह्निः शेषस्वरस्तथा ॥
समाप्तिविन्दुसहिता संहितास्तु तृतीयकम् ।
एतत्तत्त्वं विजानाति यो नरो भुवि भूमणिः ॥
सिद्धविद्याधरेभ्यश्च सोऽधिको मन्मथो महान् ।
एतत्त्रयोदश प्रोक्ता मन्त्रा मन्त्रेषु चोज्ज्वलाः ॥
विंशतेस्तु सहस्रेभ्यः पराश्चैते प्रकीर्त्तिताः ।
विंशतेस्तु सहस्राणामाद्यमेतत् प्रकीर्त्तितम् ॥"
तस्या ध्यानं यथा,—
"चतुर्भुजां रक्तवर्णां रक्तवस्त्रविभूषिताम् ।
दक्षिणोर्द्धे सजपाधो बिभ्रतीं पुस्तकोत्तमम् ॥
अभयं वामहस्ताभ्यां वरञ्च दधतीं तथा ।
सहस्रसूर्य्यसङ्काशां त्रिनेत्रां गजगामिनीम् ॥
पीनोत्तुङ्गस्तनयुगां सितप्रेतासनस्थिताम् ।
स्मितप्रभिन्नवदनां सर्व्वालङ्कारसंयुताम् ॥
तिसृभिर्म्मुण्डमालाभिः शिरोवक्षःकटीषु च ।
त्रिगुणं त्रिगुणीभूतैः प्रत्येकं परिभूषिताम् ॥
मदिराघूर्णनयनां रक्तदन्तच्छदद्वयाम् ।
चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम् ॥"
इति कालिकापुराणे ७७ अध्यायः ॥

त्रिपुरमल्लिका, स्त्री, (त्रीणि पुराणि दलाष्टत्तयो यस्याः । सा चासौ मल्लिका चेति ।) पुष्पवृक्षविशेषः । त्रिपुरमालिका इति ख्याता । तत्पर्य्यायः । शेषमा ९ । इति त्रिकाण्डशेषः ॥

त्रिपुरा, स्त्री, (त्रीन् धर्म्मार्थकामान् पुरति पुरतो ददातीति । पुर अग्रगमने अच अग्रदाने+"इगुपधज्ञेति ।" ३।१।१३५ । इति कः । ततष्टाप् ।) देवीविशेषः । तन्मन्त्रध्यानादिकं यथा;—
"श्रृणुतं त्रिपुरामूर्त्तेः कामाख्यायास्तु पूजनम् ।
एतस्या मूलमन्त्रन्तु पूर्व्वमुत्तरतन्त्रके ॥
युवयोरिदयोः सम्यक् क्रमात्तु प्रतिपादितम् ।
वाग्भवं कामराजन्तु डामरञ्चेति तत्त्रयम् ॥
सर्व्वधर्म्मार्थकामादिसाधनं कुण्डलीयुतम् ।
त्रीन् यस्मात् पुरतो दद्यात् दुर्गा ध्याता महेश्वरी ॥
त्रिपुरेति ततः ख्याता कामाख्या कामरूपिणी ।
तस्यास्तु स्थापनं यादृक् कामाख्यायाः प्रकीर्त्तितम् ॥
तेनैव स्थापनं कुर्य्यात् मूलमन्त्रेण साधकः ।
त्रिकोणं मण्डलं चास्यास्त्रिपुरन्तु त्रिरेखकम् ॥
मन्त्रन्तु त्र्यक्षरं शेयं तथा रूपत्रयं पुनः ।
त्रिविधा कुण्डलीशक्तिस्त्रिदेवानाञ्च सृष्टये ॥
सर्व्वं त्रयं त्रयं यस्मात् तस्मात्तु त्रिपुरा मता ॥*॥
दहनं प्लवनं कृत्वा आद्यां मूर्त्तिं विचिन्तयेत् ।
त्रिधावर्त्याय हृदये तां मूर्त्तिं शृणु भैरव ! ॥
सिन्दूरपुञ्जसङ्काशां त्रिनेत्रान्तु चतुर्भुजाम् ।
वामोर्द्धे पुष्पकोदण्डं तस्याधः पुस्तकं तथा ॥
दक्षिणोर्द्धे पञ्चवाणानक्षमालां तदात्यधः ।
चतुर्णां कुणपानान्तु पृष्ठेऽर्ध्वं कुणपान्तरम् ॥
निधाय तस्य पृष्ठे तु समपादेन संस्थिताम् ।
जटाजूटार्द्धचन्द्रैस्तु समावद्धशिरोरुहाम् ॥
नम्रां त्रिवलिभङ्गेन चारुमध्यां मनोहराम् ।
सर्व्वालङ्कारसम्पूर्णां सर्व्वाङ्गसुन्दरीं शुभाम् ॥
नवद्वीपवरन्द्रोष्ठीं सर्व्वलक्षणसंयुताम् ।
एवन्तु प्रथमं ध्यात्वा त्रिधाङ्गानञ्च चिन्तयेत् ॥